संस्कृत — प्रयोग — स्मार्त

सभासदाशीर्वादि देव प्रतिष्ठा प्रयोग

क्र-नं. १७८

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

३३२

(1) श्रीगणेशायनमः॥श्रीगुरुभ्योनमः॥ ॥अथबोधायनत्रिविक्रमानुसारेणनिर्णय
सिंधूक्तःसप्रासादसर्वदेवस्थिरप्रतिष्ठाप्रयोगोलिख्यते॥ ॥तत्रतावत्कालनिर्णयः॥
वसिष्ठः॥हस्तत्रयमित्रहरित्रयेचपौष्णद्वयादित्यस्थिरेज्यभेषु॥तिस्रोत्तराधातृशशां
कभेषुसर्वामरस्थापनमुत्तमंस्यात्॥अन्यत्र॥रत्नावल्यां॥ ॥माघफाल्गुनवैशाख
ज्येष्ठाषाढेषुपंचसुमासेषुशुक्लपक्षेषुलिंगस्थापनमुत्तमं॥विष्णोरप्याहतत्रैव॥
मासेषुफाल्गुनःश्रेष्ठश्चैत्रोवैशाखएवच॥वृषेवाप्याश्वयुग्मासेश्रावणेमासिवा
भवेत्॥ ॥हेमाद्रौतु॥ ॥फाल्गुनचैत्रवैशाखज्येष्ठाषाढेषुपंचसुशुभ॥अन्येष
शुभः॥देव्याःआश्विनेपिशुभा॥मात्स्ये॥चैत्रेवाफाल्गुनेवापिज्येष्ठेवामाधवेतथा॥
माघेवासर्वदेवानांप्रतिष्ठाशुभदाभवेत्॥आषाढेद्वेतथामूलमुत्तरात्रयमेव
च॥ज्येष्ठाश्रवणरोहिण्यःपूर्वाभाद्रपदातथा॥हस्ताश्विनीरेवतीचपुष्योमृगशि
रस्तथा॥अनूराधातथास्वातीप्रतिष्ठासुप्रशस्यते॥रिक्तावर्जंशुक्लसर्वति

(2)

स० प्रा० थिषु शुभ ॥ तथा च शनि भौमान्यतमवारेषु शुभा ॥ लिंगस्थापने विशेषः ॥ उत्तरायणे लिंग
॥१॥ स्थापनं श्रेष्ठं ॥ दक्षिणे भयावहं भवति ॥ कश्चित् श्रावणेपि लिंगस्थापनमुक्तं ॥ ॥
अथ मंडपादि ॥ कर्तृशुभेह्नि षोडश द्वादश हस्तं वा मंडपं कृत्वा मध्ये वेदिं तत्पूर्वतो
हस्तमात्रं त्रिवप्रां ग्रहवेदिं नैऋते वास्तुवेदिं हस्तमात्रामाग्नेये हस्तमात्रं कुंडं स्थंडिलं वा
मध्यवेद्यां सर्वतोभद्रं च कृत्वा तदुपरि वितानं कदलीस्तंभादिना भूषयित्वा प्रतिष्ठा
दिनात् पूर्वदिने सद्यो वा संकल्पं कुर्यात् ॥ तत्र यजमानः ॥ कूष्मांडहोमादिना आत्मतनु
पूजां कृत्वा स्वभार्यासहासने उपविश्याचम्य प्राणानायम्य देशकालौ स्मृत्वा अस्मिन्
लिंगे मूर्तौ वा देवकला सांनिध्यार्थं दीर्घायुर्लक्ष्मी सर्वकाम समृध्यक्षय्ये स्वर्गकामोहं
एकाहाधिवासनपक्षमाश्रित्य वास्तुग्रहयज्ञसहितां प्रासादपिंडिकापरिवारयुतां
शिवप्रतिष्ठां विष्णुप्रतिष्ठां वा करिष्ये ॥ तदंगतया विहितं स्वस्तिपुण्याहवाचनं मातृका ॥१॥
पूजनं नांदीश्राद्धं आचार्यादिवरणं च करिष्ये ॥ आदौ निर्विघ्नतासिध्यर्थं म गणप

(2A)

तिपूजां करिष्ये ॥ इति संकल्प्य ॥ आचार्यवर्णातं कुर्यात् ॥ ततो वृतान्त्विजः मधुपर्केणार्ह
यित्वा वस्त्रालंकारादिभिः संपूज्य ॥ यजमानः सन्नप्रलिकरपूर्णकुंभदध्यक्षतफलपुष्पसुवा
सिनीभिः सहितो मंगलघोषेण शाकुनसूक्तं पठन् मंडपप्राग्दक्षिण्येन गत्वा पश्चिमद्वा
रेण मंडपं प्रविश्य वेद्याः पश्चिमत उपविश्य ॥ देशकालौ स्मृत्वा अमुकप्रतिष्ठांगत्वेन
यजमानेन वृतोऽहं विहितकर्म करिष्ये ॥ कर्माधिकारार्थं आसनादिन्यासान् पवनपा
वनं च करिष्ये इति संकल्प्य कुर्यात् ॥ अथाचार्य यदत्र संस्थितमिति सर्षपान्विकीर्य
शुचीवो हव्या इति पंचगव्येनापोहिष्ठेति कुशोदकेन च भूमिं प्रोक्ष्य स्वस्त्ययनं तार्क्ष्यमि
ति जपित्वा देवा आयांतु यातुधाना अपयांतु विष्णो देवयजनं रक्षस्वेति भूमौ प्रादेशं
कुर्यात् ॥ देशकालौ स्मृत्वा अमुकप्रतिष्ठांगत्वेन मंडपप्रतिष्ठां करिष्ये इति संकल्प्य
मंडपपूजादिकं निर्वर्त्य प्राग्द्वारे मंडपं प्रविश्य वेद्युत्तरजलाधिवासं कुर्यात् ॥ दि

स॰भासा॰ रण्योपधानं देवं पंचगव्यं हिरण्ययवदूर्वाश्वत्थपलाशपर्णैरापोहिष्ठेतितिसृभिर्हिरण्यव
॥२॥ र्णाइतिचतसृभिः पवमानः सुवर्जन इत्यनुवाकेनाभिषिच्य॥ आहुतिभिरिदंविष्णुरितिपुष्प
फलयवदूर्वाः समर्प्य॥ नमस्तेरुद्रमन्यवइतिरुद्रे॥ रक्षोहणमितिहस्तेकंकणंबध्वावास
सा आच्छाद्य उअवतेहेडउदुत्तममितिजलेधिवासयेत्॥ इदंबोधायनोक्तं॥ ततोगोदो
हनमात्रंस्थित्वा॥ देवंनत्वास्वागतंदेवदेवेशविश्वरूपनमोस्तुते॥ शुद्धेपित्वदधिष्ठा
नेशुद्धिः कुर्मः सहस्रतां॥ इतिसंप्रार्थ्य॥ उत्तिष्ठब्रह्मणस्पतेइतिसकृदुत्थाप्य॥ अग्न्यु
त्तारणंकुर्यात्॥ अग्निःसप्तमितिसप्ततं अग्निपदहीनं पठित्वा तत्सहितंपुनःपठेत्॥
एवमष्टसहस्रमष्टशतमष्टाविंशतिवारं पठन् जलेपातयेत्॥ ततोर्चांमृदाद्वाद
शवारंजलेनचप्रक्षाल्यमंत्रवत्पंचगव्यं कृत्वा पयःपृथिव्यामावोराजानमितिचसं ॥२॥
स्नाप्य॥ आप्यायस्व॰ दधिक्राव्णो॰ मधुवाता॰ आयंगौः॰ इतिपंचामृतैः संस्नाप्य॥ लिं

(3A)

गं॑चेत्‌ नमस्ते रुद्र मन्यव इत्यष्टभिः संस्नाप्य॥ घृतेनाभ्यज्य॥ उद्वर्त्तनेनाद्वर्त्य॥ उष्णोदके
न प्रक्षाल्य॥ गंधं दत्वा॥ सपल्लवैश्चतुर्भिः कुंभैरापो हिष्ठेति तिसृभिः आकलशेष्विति च
प्रत्येकं समुद्रज्येष्ठेति चतुर्भिराकलशेष्विति च मौलितैः संस्नाप्य॥ औदुंबरपीठे
र्चीमुपवेश्य॥ परितोष्टदिक्षु सजलं कुंभान्‌ संस्थाप्य तेषु गंधपुष्पदूर्वाः क्षिप्त्वा॥ आ
द्ये सप्तमृदः॥ द्वितीये पुष्करपर्णशमीविकंकताश्मंतकत्वचः॥ पल्लवांश्च २ तृतीयादि
षु सप्तधान्य ३ पंचरत्न ४ फलपुष्पाणि ५ कुश दूर्वा गोरोचन ६ संपातोदक ७ सर्वौष
धीः ८ क्षिप्त्वा क्रमेणापो हिष्ठामयोभुव इति तिसृभिर्हिरण्यवर्णाः शुचयः पावक इति
चतसृभिः पवमानानुवाकेनाभिषिच्य॥ एककुंभे शमीपलाशवटखदिरबिल्वाश्व
त्थविकंकतपनसाम्रशिरीषोदुंबराणां पल्लवान्‌ कषायांश्च क्षिप्त्वा॥ अश्वत्थेव
इत्यभिषिच्य॥ पंचरत्नोदकेन हिरण्यवर्णा इति संस्नाप्य वाससी दत्वा उपवीतादि

स·श्रासा· दीपांतकृत्वा॥हिरण्यगर्भः१यआत्मदा२यःप्राणतो३यस्येमे४येनद्यौ५यंक्रंदसी६आपो
॥३॥ हयत्७याश्चिदापो८इत्यष्टौयवदीपान्दत्वा॥स्वर्णशलाकयातेजसपात्रस्थमधु
घृतंचगृहीत्वा॥चित्रंदेवानांतेजोसीतिमंत्राभ्यां॥ॐनमोभगवतेतुभ्यंशि
वायहरयेनमः॥हिरण्यरेतसेविष्णोविश्वरूपायतेनमः॥इतिदक्षिणसव्य
नेत्रेमंत्रावृत्यालिखेत्॥अंजतित्वेत्यंजनेनमधुनाचोक्त्वा॥देवस्यत्वेतिम
ध्वाज्यशर्कराभिरुक्त्वातेनैवांजनेनपुनरंजयेत्॥अनज्मीतिश्रेषः॥लिंगेतु
स्वर्णसूच्यागंधेन॥ॐनमोभगवतेरुद्रायहिरण्यरेतसेपरायपरमात्म
नेविश्वरूपायोमाप्रियायनमइत्युक्त्वा॥अंजनादिनादेवस्यत्वेत्यंजयेत्॥
ततआदर्शभक्ष्यादिदर्शयेत्॥ततःकर्ताआचार्यायगांऋत्विग्भ्यश्चद ॥३॥
क्षिणांदद्यात्॥अथाचार्यः॥प्रत्यृचमादौप्रणवंवदन्पुरुषसूक्तेनस्फ

Joint project of the Rajawade Samshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(5A) तावंत्रपात्रे पंचवर्णोदनेनदेवस्यनीराजनं कृत्वा ॥ चतुष्पथे रुद्राय क्षिपेत् ॥ अथा
चार्यः ॥ वेद्यां सर्वतोभद्रे देवानावाहयेत् ॥ मध्ये ब्रह्मणे नमः ब्रह्माणं आवाहयामि ॥ एवं
सर्वत्र ॥ पूर्वादिदिक्षु ॥ इंद्राय नमः अग्नये० यमा० निर्ऋतये० वरुणा० वायवे० सो
माय० ईशानाय० ईशानेंद्राद्यंतरालेषु वसुभ्यो० रुद्रेभ्यो० आदित्येभ्यो० अश्विभ्यां०
विश्वेभ्योदेवेभ्यो० पितृभ्यो० नागेभ्यो० स्कंदवृषाभ्यां० ब्रह्मेशानाद्यंतरालेषु ॥ द
क्षाय० विष्णवे० दुर्गायै० स्वधायै० मृत्युरोगेभ्यो० समुद्रेभ्यो सरिभ्यो० मरुभ्यो
न० गणपतये० मध्ये ब्रह्मसमीपे ॥ पृथिव्यै० भैरवे० तत्रैव स्थाप्य देवं प्रतिमा
यामावाह्य ॥ प्रागादिषु ॥ वज्रं० शक्तिं० दंडं० खड्गं० पाशं० अंकुशं० गदां० त्रिशूल
ळं० तद्वात्ये ॥ गौतमं० भरद्वाजं० विश्वामित्रं० कश्यपं० जमदग्निं० वसिष्ठं० अ

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(८)

स॰प्रासा॰ त्रिं॰ अरुंधतीं च तद्वत्ये ॥ सूर्यं॰ सोमं॰ भौमं॰ बुधं॰ गुरुं॰ शुक्रं॰ शनिं॰ राहुं॰ केतुं॰ ॥ तद्वा
॥४॥ त्ये ॥ ऐंद्री॰ कौमारी॰ ब्राह्मी वाराही॰ चामुंडा॰ वैष्णवि॰ माहेश्वरी॰ वैनायकी॰ एतानाम
भिरावाह्य संपूज्य ॥ अर्चायां देवं तन्मंत्रेणावाह्य संपूज्य मंडल मध्ये चांस्कप्रातिष्ठितो भवे
तिनेवेश्य संपूज्य ॥ वेधु परिधुरोभागे देवाउन्नतेवाथथा सोपस्करां शय्यामुपकल्प्य
शय्यायां देवमारोप्य पुरुषसूक्तोत्तर नारायणाभ्यांस्क त्वादे वेन्याकुर्यात् ॥ यथा ॥ पुरु
षात्मने नमः ॥ प्राणात्मने॰ प्रकृतितत्वाय॰ बुद्धितत्वा॰ अहंकारतत्वा॰ मनस्तत्वाय॰
इति सर्वांगे ॥ प्रकृतितत्वाय॰ बुद्धितत्वाय॰ हृदि॰ शब्दतत्वाय॰ शिरसि॰ स्पर्शतत्वा
य॰ त्वचि॰ रूपतत्वाय॰ हृदि॰ रसतत्वाय॰ मुखे॰ गंधतत्वाय॰ नासिके॰ श्रोत्रत
त्वाय॰ श्रोत्रयोः॰ त्वक्तत्वाय॰ त्वचि॰ चक्षुस्तत्वाय॰ चक्षुषोः॰ जिह्वातत्वाय॰ ॥४॥
जिह्वायां ॥ घ्राणतत्वाय॰ घ्राणे ॥ वाक्तत्वाय॰ वाचि ॥ पाणितत्वाय॰ हस्तयोः ॥ पद

(5A)

तत्वाय० पादयोः॥ पायुतत्वाय० पायौ॥ उपस्थतत्वाय० उपस्थ० पृथ्वीतत्वाय० पादादिजानुपर्यंतं॥ अपूतत्वाय० जान्वादिनाभिपर्यंतं॥ तेजस्तत्वाय० नाभ्यादिहृदयांतं॥ वायुतत्वाय० हृदयादिभ्रूमध्यांतं॥ आकाशतत्वाय० भ्रूमध्यादिशिरोंतं॥ सत्वतत्वाय० रजःस्तत्वाय० तमस्तत्वाय०॥ इतिसर्वांगे॥ ॥अथपुरुषसूक्तन्यासः॥ ॥ॐसहस्रशीर्षा० वामकरे० पुरुषएवेदं० दक्षिणकरे० एतावानस्य० वामपादे० त्रिपादूर्ध्व० दक्षिणपादे० तस्माद्विराळ० वामजानु० यत्पुरुषेण० दक्षिणजानौ० तंयज्ञं० वामकट्यां० तस्माद्यज्ञात्सर्वहुतःसंभृतं० दक्षिणकट्यां० तस्माद्यज्ञात्सर्वहुतऋचः० नाभौ० तस्मादश्वा० हृदये० यत्पुरुषंव्यदधुः० कंठे० ब्राह्मणोस्यमुख० वामबाहू० चंद्रमामनः० दक्षिणबाहौ० ना

(८)

स॰ प्रासा॰ ॥५॥ भ्या आसीदिति॰ मुखे॰ सप्तास्यासन्॰ नेत्रयोः॰ यज्ञेन यज्ञमिति॰ शिरसि॰॥ ततः स्रु
खशायीभवेति शय्यायां देवं स्वापयित्वा मंडलशय्योरंतराले न गंतव्यमिति प्रे
षं दत्वा॥ मंडलदेवताभ्यो नाममंत्रैः पायसेन बलिं दद्यात्॥ तत आचार्यः कुंडांतिक
मागत्य॥ देशकालौ स्मृत्वा अमुकप्रतिष्ठांगत्वेन हवनं कर्तुं कुंडोल्लेखनाद्यग्निं
प्रतिष्ठां करिष्ये॥ कुंडमुपलिप्य उल्लिख्य॥ उपरि मेखलायां॥ इदं विष्णुरिति विष्णुं॥
मध्ये मेखलायां ब्रह्मयज्ञानमिति ब्रह्माणं॥ अधो मेखलायां कद्रुद्रायेति रुद्रं॥
योन्यां गौरीर्मिमायेति गौरीं॥ एता देवता आवाह्य संपूज्य॥ स्वगृह्योक्तविधिनाग्निं
प्रतिष्ठाप्य॥ नैर्ऋत्यां वेद्यां वास्तुपूजां कुर्यात्॥ तद्यथा॥ सप्रासादामुकप्रतिष्ठांग
त्वेन वास्तुदेवतापूजां करिष्ये॥ इति संकल्प्य॥ वस्त्रे स्वर्णशलाकया कुंकुमादि ॥५॥
नानवरेखाः प्रागायता नव उदगायताः कुर्यात्॥ तत्रादौ वेधा ईशानादिकोणे पुरं

(6A)

कून्रोपयेत्॥ विश्रांतु भूतले नागालोकपालाश्च सर्वशः॥ मंडपेत्रावतिष्ठंतु आयुर्बलक
राः सदेति शंकून्रोपयेत्॥ अग्निभ्योप्यथ सर्पेभ्यो ये चान्ये तत्समाश्रिताः॥ तेभ्यो ब
लिं प्रयच्छामि पुण्यमोदनमुत्तममिति शंकुपार्श्वे माषभक्तबलिं दद्यात्॥ ततो रेखा
स्त देवता आवाहयेत्॥ ॐ शांतायै॰ ॐ यशोवत्यै॰ कांतायै॰ विशालायै॰ प्राणवाहिन्यै॰
सत्यै॰ सुमनायै॰ नंदायै॰ सुभद्रायै॰॥ उदगग्रतास्तु॥ हिरण्यायै॰ सुव्रतायै॰ लक्ष्म्यै॰
विभूत्यै॰ विमलायै॰ प्रियायै॰ जयायै॰ कालायै॰ विशोकायै॰॥ मध्यकोष्टचतुष्टयमे
कीकृत्य ततः कोणेषु रेखा दद्यात्॥ तेनार्धपदानि संपद्यंते॥ ततस्तत्र ब्रह्मादीनावाहये
त्॥ ततो मध्यपदचतुष्के ब्रह्मणे नमः ब्रह्माणमावाहयामीति सर्वत्र॥ १॥ तत्पूर्वप
दद्वये अर्यम्णे न॰ अर्यमणं॰ २ तद्दक्षिणपदद्वये विवस्वते॰ विवस्वतं ३ पश्चिमप
दद्वये मित्राय॰ मित्रं ४ उदक्पदद्वये पृथ्वीधराय॰ पृथ्वीधरं॰ ५ आग्नेयपदा

(७)

स०प्रासा० ॥६॥ र्धयोः सावित्राय० सावित्रं० ६ सावित्रे० सावितारं० ७ नैरृत्यपदार्धयोः विबुधाधिपाय०
विबुधाधिपं० ८ जयाय० जयं ९ वायव्यपदार्धयोः राजयक्ष्मणे० राजयक्ष्माणं० १० रुद्रा
य० रुद्रं० ११ ईशानपदार्धयोः आपाय० आपं आ० १२ आपवत्साय० आपवत्सं० १३ ईशा
नपदक्षिणार्धे शिखिने० शिखिनं० १४ तद्दक्षिणसार्धपदे पर्जन्याय० पर्जन्यं० १५ तद्द
क्षिणपदद्वये जयंताय० जयंतं० १६ तद्दक्षिणपदद्वये कुलिशायुधाय० कुलिशायुधं १७
तद्दक्षिणपदद्वये सूर्याय० सूर्यं० १८ तद्दक्षिणपदद्वये सत्याय० सत्यं० १९॥ तद्दक्षिणसा
र्द्धपदे भृशाय० भृशं २० तद्दक्षिणाग्नेयपदार्धे आकाशाय० आकाशं २१ तत्पश्चिमा
र्धे वायवे० वायुं २२ तत्पश्चिमसार्धपदे पूष्णे० पूषणं० २३ तत्पश्चिमपदद्वये वित
थाय० वितथं २४ तत्पश्चिमपदद्वये ग्रहक्षताय० ग्रहक्षतं आ २५ तत्पश्चिमपदद्व ॥६॥
ये यमाय० यमं० २६ तत्पश्चिमपदद्वये गंधर्वाय० गंधर्वं० २७ तत्पश्चिमसार्धपदे

(7A)

भृंगराजाय॰ भृंगराजं २८ तत्पश्चिमनैर्ऋत्यपदार्धे मृगाय॰ मृगं २९ तदुत्तरार्धे पितृभ्यो
न॰ पितॄन् ३० तदुत्तरासार्धपदे दौवारिकाय॰ दौवारिकं ३१ तदुत्तरपदद्वये सुग्रीवाय॰ सु
ग्रीवं ३२ तदुरपदद्वये पुष्पदंताय॰ पुष्पदंतं ३३ तदुरपदद्वये वरुणाय॰ वरुणं ३४
तदुत्तरपदद्वये असुराय॰ असुरं॰ ३५ तदुरसार्धपदे शोषाय॰ शोषं ३६ तदु
त्तरवायव्यपदार्धे पापा॰ पापं ३७ तत्प्राक्पदार्धे रोगाय॰ रोगं ३८ तत्प्राक्सार्ध
पदे अहिन्ये॰ अहिनीं ३९ तत्प्राक्पदद्वये मुख्याय॰ मुख्यं ४० तत्प्राक्पदद्वये भ
ल्लाटाय॰ भल्लाटं ४१ तत्प्राक्पदद्वये सोमाय॰ सोमं ४२ तत्प्राक्पदद्वये सर्पेभ्यो
सर्पान् ४३ तत्प्राक्सार्द्धपदे अदितये॰ अदितिं ४४ तत्प्रागर्धपदे दितये न॰ दि
तिं ४५ उत्तरे वास्तोष्पतये॰ वास्तोष्पतिं ४६ ततः ईशान्यादिविदिक्षु ॥ चरकीं

स० प्राशा० विदारीं० पूतनां० पापराक्षसीं० पूर्वादिदिक्षु ॥ स्कंदं० अर्यमणं० जृंभकं० पिलिपिछं० ततो
॥७॥ मंडलादीशाने कुंभं संस्थाप्य तत्र वरुणमावाह्य पूजयेत् ॥ ततो ब्रह्मादिभ्यः पायसेन
बलिं दद्यात् ॥ ततो ग्रहवेद्यां नवं वस्त्रं निधाय ॥ तत्र मध्ये सकर्णिकमष्टदलं विधाय त
त्र ग्रहमंडलानि विलिख्य नवग्रहदेवतास्थापनं कुर्यात् ॥ अत्रायं प्रयोगः ॥ अद्येत्या
दि० अमुककर्मांगत्वेन ग्रहपीठदेवतास्थापनपूजनं च० ॥ प्रणवस्य ब्रह्माऋषिः ॥
परमात्माग्निर्देवता ॥ दैवीगायत्री छंदः ॥ व्याहृतीनां क्रमेण जमदग्निभरद्वाजभृ
गवो ऋषयः ॥ अग्निर्वायुः सूर्यो देवताः ॥ दैवीगायत्री दैव्युष्णिक् दैवीबृहत्यश्छंदां
सि ॥ सूर्याद्यावाहने वि० ॥ मध्ये सूर्यं ॐ भूर्भुवः स्वः कलिंगदेशोद्भव काश्यपसगोत्र
सूर्येहागच्छेह तिष्ठेति स्थापयेत् ॥ आग्नेये सोमं ॐ भू० यमुनातीरोद्भवात्रेयसगो ॥८
त्र सोम इ० ॥ दक्षिणे भौमं० ॐ भू० अवंतीसमुद्भव भारद्वाजसगोत्र भौमं० इ० ॥

(8A)

ईशान्यांबुधं ॐ भू० मगधदेशोद्भवात्रेयसगोत्रबुध०॥उत्तरे बृहस्पतिं॥ॐ भू० सिंधु
देशोद्भवांगिरससगोत्रबृहस्पते०॥पूर्वे शुक्रं॥ॐ भू० भोजकटदेशोद्भव भार्गवसगोत्र
शुक्रेहा०॥पश्चिमे शनिं॥ॐ भू० सौराष्ट्रदेशोद्भव काश्यपसगोत्र शनैश्चरेहा०॥
नैर्ऋत्ये राहुं॥ॐ भू० राठीनापुरोद्भव पैठीनससगोत्र राहोइ०॥वायव्ये केतुं०ॐ भू० अंत
र्वेदिसमुद्भव जैमिनिसगोत्र केतोइ०॥ ॥अथाधिदेवताः सूर्यादीनां दक्षिणपार्श्वे
क्रमेणस्थाप्याः॥ओं भू० त्र्यंबकाय० त्र्यंबकं आ०॥ॐ भू० उमायै०ॐ भू० स्कंदाय०॥
ॐ भू० नारायणाय०॥ॐ भू० ब्रह्मणे न०ॐ भू० शक्राय०॥ओं भू० यमाय०॥ॐ भू०
कालाय०॥ॐ भू० चित्रगुप्ताय०॥ ॥अथ प्रत्येधिदेवता॥ वामपार्श्वे स्थाप्य॥ॐ
भू० अग्नये०॥ॐ भू० अद्भ्यो न०॥अप आ०॥ॐ भू० भूम्यै न०॥ॐ भू०॥विष्णवे न०
ॐ भू०॥इंद्राय०॥ॐ भू०॥इंद्राण्यै न०ॐ भू० प्रजापतये न०॥ॐ भू० सर्पेभ्यो न०॥

स॰ प्रासा॰ ॐ भू॰ ॥ ब्रह्मणे न॰ ॥ ॥ ततो विनायकादीन् पंच ॥ ॥ ॐ भू॰ ॥ गणपतये न॰ ॥ ॐ भू॰
॥ ८ ॥ दुर्गायै न॰ ॥ ॐ भू॰ वायवे न॰ ॥ ओं भू॰ ॥ आकाशाय न॰ ॥ ओं भू॰ ॥ अश्विभ्यां॰ ॥ अश्वि
नौ आ॰ ततइंद्रादि लोकपालान् ॥ ॐ भू॰ इंद्राय॰ ॥ इंद्रं आवा॰ ॥ इत्यावाह्य ॥ ईशान्यां
कलशं संस्थाप्य तत्र वरुणमावाह्य ॥ क्रमेण सर्वान् संपूज्येत् ॥ ॥ तत आचार्यः ॥
अग्निसमीपमागत्यान्वाधानं कुर्यात् ॥ अत्र प्रधानं ॥ प्रथमं वास्तुहोमे ॥ ब्रह्मा
दि पंचचत्वारिंशद्देवताः समित्तिलपायसाज्यद्रव्यैः प्रति द्रव्यं अष्टाष्ट संख्याका
हुतिभिः ॥ वास्तोष्पते वास्तोष्पत इति चतस्रभिः पूर्वोक्तद्रव्यैः प्रति द्रव्यमष्टाविंश
ति संख्याकाहुतिभिः ॥ वास्तोष्पत इति चतसृभिर्वास्तोष्पते ध्रुवा स्थूणाभिस्यन्
याचएकैकाहुत्या बिल्वफलेन ॥ चरक्यादि देवताः पूर्वोक्तद्रव्यैः चतुश्चतुः सं ॥ ८ ॥
ख्याकाहुतिभिर्यक्ष्ये ॥ ॥ ग्रहहोमे ॥ सूर्यादिग्रहप्रधानदेवताः अर्कादिसमि

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(9A)

रुआज्यद्रव्यैः अष्टाष्ट संख्याका हुतिभिः ॥ दिनायकादीन् पंच इंद्रादि लोकपालान् तैरेव द्रव्यैः चतुः श्चतुः संख्याका हुतिभिर्यक्ष्ये ॥ प्रधान होमे ॥ लोकपाल मूर्ति मूर्तिपत्नीन् पलाशोदुंबराश्वत्थ शम्य पामार्ग समिदाज्य तिल द्रव्यैः प्रति द्रव्यं प्रत्यकेमष्टाविंशति संख्याकाभिः अष्टाष्टसंख्याभिर्वा ॥ स्थाप्य देवं पलाशोदुंबराश्वत्थशम्यपामार्ग समितिलाज्य द्रव्यैः प्रतिद्रव्यं अष्टोत्तरसहस्राष्टोत्तर शताष्टाविंशत्यन्यतम संख्याभिः ॥ अग्निर्यजुर्भिरित्यनुवाकेन प्रतिद्रव्यं दश दश संख्याकाभिराहुतिभिः ॥ पिंडिकां प्रति द्रव्यं अष्टाष्ट संख्याकाभिराहुतिभिः ॥ परिवार देवताः प्रतिद्रव्यमष्टाष्ट संख्याका ॥ एवं पंच पर्यायैर्यक्ष्ये ॥ विष्णुस्थाप्यश्चेद्धि शेषहोमः तदन्वाधानं ॥ विष्णुं पुरुषसूक्तेन चतुरावृत्तिभिराज्येन ॥ ॥ रुद्रश्चेद्विशेषः ॥ शिवं या त इषुरित्यनुवाकां तं द्रापे सह स्त्राणीत्यनुवाकाभ्यां च चतुरावृत्तिभिः प्रतिमंत्रमाज्ये

(१०)

स॰प्रासा॰ न॥ ॥प्रासादाधिवासनहोमे॥ पिंडिकावाहनपरिवारदेवताः प्रत्येकं अष्टाविंशति
॥८॥ संख्यया तिलद्रव्येण॥ स्थाप्यदेवतां अष्टोत्तरशतसंख्यया चरुद्रव्येण यज॥ प्रासा
दोत्सर्गांगंहोमे वास्तोष्पत इति मंत्रेण अष्टोत्तरशतसंख्यया घृतेन॰ स्थाप्यदेवं अ
ष्टोत्तरशतसंख्यया आज्येन॰॥ ब्रह्मादिमंडलदेवताः प्रत्येकं दश दशाहुतिभिः घृ
तात्क्तिलद्रव्येण यक्ष्ये॥ शेषेण स्विष्टकृतमित्यादि॥ आज्यभागांतं कृत्वा अग्नेरु
त्तरतः संपातकलशं संस्थाप्य तस्मिन् आज्यहोमे संपातान्नयेत्॥ अथ यजमाने
न द्रव्यत्यागे कृते ऋत्विक्सहित आचार्यो न्वाधानक्रमेण होमं कुर्यात्॥ तत्र
होमे मंत्राः॥ वास्तुहोमं ग्रहहोमे चरुत्वा॥ प्रतिद्रव्यहोमांते देवं पादनाभिःशि ॥८॥
रः स्पृशेत्॥ आधानहोमेः॥ इंद्रायेंद्रो॥१॥ स्योना पृथिवि॰२॥ अघोरेभ्योथ॰३

(10A) अग्नआयाहि० ४ अग्निंदूतं० ५॥ नमःशर्वाय० ॥६॥ यमायसोमं० ७ असिहिवीरसे० ८
स्तुहिश्रुतं० ९ अस्कन्नवंतम० १० आकृष्णेन० ११ योरुद्रोअग्नौ० १२ इमंमेवरुण० १३ शन्नो
देवी० १४ नमोभवायच० १५ आनोनियुद्भिः० १६ ॥ वातआवातु० १७ तमीशानं० १८ आप्या
यस्व० १९ वयंसोमव्रते० २० तत्पुरुषायविद्महेमहादेवायधीमहि० २१ अभित्वादे० २२
आदित्प्रत्न० २३ नमउग्रायचा० २४ ॥ इतिलोकपालादिहोमः॥ ॥अथपलाशसमि
दादिद्रव्यसप्तकेनस्थाप्यदेवतामंत्रेण...कसंख्याहोमः॥ अग्नियेतनुर्भिरित्यनुवा
केनप्रतिद्रव्यं १० होमः॥ पिंडिकामंत्रेणप्रतिद्रव्यं ८ होमः पिंडिकामंत्रस्तु॥ हीश्चते
ऌ० इतिविष्णुपिंडिकायां॥ ॥गौरीमिमायेतिशिवपिंडिकायां॥ चित्रंदेवानामिति
सूर्यपिंडिकायां॥ ॥परिवारदेवानांमध्येयेषांस्थापनंतेषांमंत्रेणप्रतिद्रव्यं ८ हो
मः इतिप्रथमपर्यायंहुत्वादेवस्यपादौस्पृशेत्॥ द्वितीयंहुत्वानाभिं॥ तृतीयेमध्यं॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(11)

स० प्रासा० चतुर्थेऽङ्गित्तरः ॥ पंचमेऽग्निशिरः ॥ स्पृष्ट्वा ॥ प्रतिपर्यायं संपातजलेन देवमभिषिंचेत् ॥ ततः पुरुष
॥१०॥ सूक्तेन प्रत्यृचमाज्यं हुत्वा ॥ इदं विष्णुरिति पादौ स्पृशेत् ॥ पुनस्ताएव हुत्वा विष्णोर्नु
कमिति नाभिं० पुनस्ताएव हुत्वा अतो देवा इति शिरः ॥ पुनस्ताएव हुत्वा ॥ पुरुषसूक्तेन
सर्वांगं स्पृशेत् ॥ ॥ रुद्रेषु ॥ यातइषुरित्यनुवाकांतं द्रापे सहस्राणीत्यनुवाकाभ्यां च प्र
त्यृचमाज्यं हुत्वा सर्वो वै रुद्र इति मूलं स्पृशेत् ॥ पुनस्ताएव हुत्वा कद्रुद्रायेति मध्यं ॥
पुनस्ताएव हुत्वा नमो हिरण्यबाहव इत्यग्रं ॥ पुनस्ताएव हुत्वा सर्वरुद्रेण सर्वांगं स्पृशे
त् ॥ अथ प्रासादाधिवासनोत्सर्गांगहोमः ॥ पिंडिका परिवारदेवमंत्रैः प्रत्येकं २८
संख्यया होमं तिलैः कृत्वा ॥ मूलमंत्रेण चाष्टोत्तरशतं हुत्वा ततो वास्तोष्पत इति
मंत्रेणाष्टोत्तरशतमाज्यं हुत्वा ॥ देवमंत्रेण चाष्टोत्तरशतमाज्यं हुत्वा ॥ ब्रह्मादि ॥१०॥
देवतानां दशदशतिलाहुतिर्हुत्वा ॥ मूर्धानं दिव इति पूर्णाहुतिं जुहुयात् ॥ एवं हो

The Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai joint project

# मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com